(308)

मासिकी शोध-पत्रिका
ISSN 2278-0416

देशोऽस्ति हरियाणाख्यः
पृथिव्यां स्वर्गसन्निभः

# हरिप्रभा

वर्षम्-१४, अङ्कः-९-१०, २०१७

*प्रधान-संरक्षकः अध्यक्षश्च*
माननीय श्री मनोहरलालः
मुख्यमन्त्री, हरियाणा

*वरिष्ठ उपाध्यक्षः*
श्रीमती कविता जैन
मंत्री, सूचना, जनसम्पर्क एवं सांस्कृतिक
कार्य विभाग, हरियाणा।

*प्रधानसम्पादकः*
श्री राजेश कुमार खुल्लरः, भा.प्र.से.
प्रधान सचिवः
सूचना-जनसम्पर्क, भाषा एवं कार्यकारी उपाध्यक्षश्च, अकादमी

*प्रबन्धसम्पादकः*
श्री समीरपाल सरो, भा.प्र.से.
महानिदेशकः,
सूचना-जनसम्पर्क एवं सांस्कृतिक-कार्यविभागः,
अकादमी

*मुख्यसम्पादकः*
डॉ. सोमेश्वरदत्तः
निदेशकः,
हरियाणा संस्कृत अकादमी

*उपसम्पादिका*
डॉ. प्रतिभा वर्मा

*परामर्शकाः*
*प्रो. वेदप्रकाशः उपाध्यायः*, (सेवानिवृत्त आचार्य) पञ्जाब विश्वविद्यालय, चण्डीगढ़।

*डॉ. मथुरादत्त पाण्डेयः*, (सेवानिवृत्त प्राचार्य) सैक्टर-15, पञ्चकूला।

*प्रो. रणवीरः सिंहः*, (सेवानिवृत्त आचार्य) कुरुक्षेत्र विश्वविद्यालय, कुरुक्षेत्र।

*प्रो. जगदीश प्रसाद सेमवालः*, (सेवानिवृत्त आचार्य) विश्वेश्वरानन्द वैदिक-शोध अनुसंधान-केन्द्र, होशियारपुर।

*प्रो. सुरेन्द्र मोहनः मिश्रः*, (आचार्य) कुरुक्षेत्र विश्वविद्यालय, कुरुक्षेत्र।

*आचार्य महावीर प्रसादः*, 317, सैक्टर- 7, यू.ई., करनाल।

*डॉ. श्रेयांशः द्विवेदी*, उपाध्यक्षः, हरियाणा संस्कृत अकादमी, पञ्चकूला।

सम्पर्कः
***निदेशकः,***
***हरियाणा संस्कृत अकादमी***
अकादमी भवनम्, पी-१६, सैक्टर- १४,
पञ्चकूला (हरियाणा)
दूरभाषः- ०१७२-२५७०९७९
*अणुसङ्केतः-hariprabhaskt@gmail.com*

***ग्राहकतायाः कृते***
प्रत्यङ्कं मूल्यम् - दशरुप्यकाणि
वार्षिकशुल्कम् - विंशत्युत्तरशतं रुप्यकाणि

# अनुक्रमणिका


| | | | पृष्ठसंख्या |
|---|---|---|---|
| | प्राक्कथनम् | | २ |
| | सम्पादकीयम् | | ६ |
| १. | भारतगौरवम् | डॉ. रामेश्वर दत्त शर्मा | ८ |
| २. | वेदेषु दैवी-द्रव्य-चिकित्सा | डॉ. आचार्यबृहस्पतिमिश्र: | ९ |
| ३. | वेदार्थ विमर्श: | डॉ. शशिकान्त राय | १५ |
| ४. | वेदोक्ता भ्रष्टाचारोन्मूलनोपाया: | गोपी शर्मा | १९ |
| ५. | न्यायदर्शन सिद्धान्तविचार | ज्योति भारती | २३ |
| ६. | महाभाष्यकारस्य लौकिकोदाहरणप्रस्तुतिकला | प्रतिभा आर्या | २६ |
| ७. | पातञ्जलयोगसूत्रे व्यक्तित्वविकाससम्बद्धं शैक्षिकतत्त्वम् | श्री नवीन आर्य: | ३२ |
| ८. | श्रीमहागणपतिसहस्रनामनिर्वचनकारिका | डॉ. जगदीश प्रसाद सेमवाल | ४२ |
| ९. | अधुना संस्काराणाम् आवश्यकता-अपरिहार्या | डॉ. रामेश्वर प्रसाद गुप्त: | ४७ |
| १०. | प्राचीनभारतीयसाहित्ये सूर्यस्य शास्त्रिय -स्वरूपम् | डॉ. शिवानी शर्मा | ५३ |
| ११. | माघकाव्येऽर्थान्तरन्यासालङ्कारस्य छटा | डॉ. सुमनकुमार झा: | ६५ |
| १२. | कविता त्रयी | प्रो. रामदत्त शर्मा | ७५ |
| १३. | प्राचीन भारते स्त्रीशिक्षा: | डॉ. सुमन रानी | ७८ |

# वेदेषु दैवी-द्रव्य-चिकित्सा

*डॉ. आचार्यबृहस्पतिमिश्रः

भारतीयसंस्कृत्याः आधारस्तम्भाः एते सर्वपूज्याः वेदाः। वेदाः एव विश्वे समग्रमनुष्यतायाः अज्ञानान्धकार-निवारणकर्त्तारः प्रकाशाकराः। मनुष्यतायै सर्वोऽपि हितकारकः विषयः मूलरूपेण वेदेभ्य एव निष्पन्नः। तेषामेव मूलविषयाणां पल्लविते पुष्पिते सति तद्वारा एव मनुष्यसमुदायः अभ्युदयसिद्धिं निश्रेयससिद्धिं च विन्दति इति वेदानुरागिणां, वेदाभिमानिनां, वेदज्ञानां भारतीयानां पाश्चात्यानां च सिद्धान्तः। स्थावरजङ्गमानां समष्टि एव सृष्टिः। तत्र आत्मरहिताः स्थावराः आत्मान्विताः जङ्गमाः इति शास्त्रज्ञाः। तेषु आत्मान्विताः भोक्तारः अन्ये च भोगाः। तेषु आत्मान्वितेषु अपि मनुष्यः बुद्धिसम्वेदनायुक्तत्वात् अभ्युदयेन सह निश्रेयससिद्धेरपि प्राप्तुं शक्यत्वात् श्रेष्ठः। तत्र यद्यपि अभ्युदयनिश्रेयसकर्मणां कर्ता आत्मा एव तथापि साधनभूतत्वात् शरीरम् एव मुख्यम्। यथा उक्तं कविकालिदासेन **"शरीरमाद्यं खलु धर्मसाधनम्"**[१]

तथा च चरकसंहितायाम्-

**धर्मार्थकाममोक्षाणामारोग्यं मूलमुत्तमम्।**
**रोगास्तस्यापहर्त्तारः श्रेयसो जिवितस्य च॥**[२]

सृष्टयां भोक्तृरूपेण श्रेष्ठत्वात् मनुष्यस्य साधनभूतप्रधानत्वात् सूक्ष्मशरीरस्य पञ्चभौतिकशरीरस्य च स्वस्थतायां स्वास्थ्यरक्षणं[३] तथा धातुसाम्यस्य[४] विकृतौ व्याधियुक्ते व्याधिपरिमोक्षार्थं[५] रोगप्रशमनार्थं च यत् आयोः हिताहितस्य ज्ञापकं[६] विज्ञानम् तद् आयुर्विज्ञानम् आयुर्वेद इति नाम्ना व्यवह्रियते। एषः च आयुर्वेदः क्वचित् ऋग्वेदस्य उपवेदरूपेण[७] क्वचित् अथर्ववेदस्य उपाङ्गरूपेण[८] स्वीकृतः क्वचिच्च पञ्चमवेदरूपेण[९] स्वीकृत्य आयुर्वेदस्य माहात्म्यं स्वीक्रियते। अन्यच्च दर्शनस्य ऋषयः आयुर्वेदं परमप्रमाणरूपेण प्रमाणी-कुर्वन्ति। तत्र च न्याय-दर्शनकारः ऋषि गौतमः आप्त-प्रमाणस्य प्रामाणिकतां तार्किकरूपेण प्रतिपादयन् आह-

**मन्त्रायुर्वेदप्रामाण्यवच्च तत्प्रमाणम् आप्तप्रामाण्यात्॥**[१०]

अर्थात् यथा आयुर्वेदस्य प्रमाणं सर्वलोके वर्तते। आयुर्वेदस्य प्रामाणिकतायाः विषये न कश्चित् सन्देहं करोति। तथैव आप्तप्रमाणस्यापि प्रामाणिकता वर्तते।

वेदेषु आयुर्विज्ञानस्य बहु-विधाः अवधारणाः बीजरूपेण उपलब्धाः भवन्ति। ताः प्रवृद्धाः संसारे यत्र तत्र आयुर्वेदः, चिकित्सा-विज्ञानम्, कृमिविज्ञानम्, विषम-चिकित्सा (एलोपैथी), समचिकित्सा (होम्योपैथी), स्पर्श-चिकित्सा (रैकी), प्राकृतिक-चिकित्सा, प्राणायाम-चिकित्सा, यज्ञ-चिकित्सा, योग-चिकित्सा इत्यादि नामभिः लोकविश्रुताः जाताः।

---

* प्राध्यापकः, श्रीशक्ति संस्कृत महाविद्यालयः, श्रीनयनादेवी जी, बिलासपुर, हिमाचल प्रदेश। 